**कुतुप** पुं न० कुतप+पृषो०। १पञ्चदशधा विभक्तदिवसस्याष्टमांशे शब्दरत्ना०। ह्रस्वा कुतूः डुपच्। (छोटकुपा) चर्म्ममये ह्रस्वे २स्नेहपात्रे पु० अमरः।

**कुतुम्बुक** न० कुगतिस०। कुत्सिततिन्दुकीफले शब्दचि०

**कुतू** स्त्री कुत–बा० कू। चर्म्ममये स्नेहपात्रे (कुपो) अमरः

**कुतू(कू)णक** पु० "कुतू(कू)णकः क्षीरदोषाक्षिशूलानाम वर्त्मनि। जायते तेन तन्नेत्रं कण्डूरं च स्रवेन्मुहुः। शिशुः कुर्य्याल्ललाक्षिकूटनासावघर्षणम्। शक्तो नार्कप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः" इति माधवनिदानोक्ते बालानां नेत्रवर्त्मरोगभेदे (कुतुया)

**कुतूहल** न०कुतू चर्म्ममयं स्नेहपात्रमिव हृदयं हलति हल–अच्। अपूर्ववस्तुदिदृक्षातिशयजन्ये चेष्टाभेदे फलनिरपेक्षतया चिकीर्षिते १कौतुके अमरः "प्रियावियोगाद्विधुरोऽपि निर्भरं कुतूहलाक्रान्तमना मनागभूत्" नैष०। "कुतूहलाच्चारुशिलोपवेशम्" भट्टिः। "अप्यस्ति मे शकुन्तलादर्शनं प्रति कुतूहलम्" शकु० २प्रशस्ते ३अद्भुते च त्रि०हेमच०। "रम्यवस्तुसमालोके लोलता स्यात् कुतूहलम्" सा० द० उक्ते ४नायकयोर्भावभेदे न०। तारका० इतच्। कुतूहलित जातकौतुके त्रि०। स्वार्थे युवा० अण्। कौतूहल कौतुके न० अमरः।

**कुतृण** न०। कुगतिस०। (पाना) कुम्भग्राम् शब्दर०।

**कुतोनिमित्त** त्रि० कुतः किं निमित्तं यस्य किम्+प्रथमार्थे तसिल् ब०व०। किन्निमित्ते किंहेतुके। "कुतोनिमित्तः शोकस्ते" रामा०।

**कुत्र** अव्य०किम्+सप्तम्याः त्रल् किमः कुः। कस्मिन्नित्यर्थे प्रश्नविषये आक्षेपविषये च अधिकरणे "हा सीता केन नीता मम हृदयगता केन वा कुत्र दृष्टा" महानाट० "कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः" भाग०७।९।२५। ततो भवार्थे त्यप्। कुत्रत्य कस्मिन्भवे त्रि० "कस्यापि कुत्रत्य इहापि कस्मात्" भाग० ५।१०।२०।

**कुत्रचित्** अव्य० कुत्र+चित् मुग्ध०। क्वचिदित्यर्थे अवाकल्येन कस्मिन् देशे काले वेत्यर्थे। "असुरेभ्योभयं नास्ति युष्माकं कुत्रचित् क्वचित्" भा० व०१४२अ०। कुत्रचित् देशे क्वचित् काले इत्यर्थः। पा० अमरमते पदद्वयमिति भेदः। "विशिष्टं कुत्रचिद्बीजं स्त्रीयोनिस्त्वेव तु कुत्रचित्" मनुः। चन। कुत्रचन तत्रार्थे अव्य०।

**कुत्स** निन्दने चुरा० आत्म० सक० सेट्। कुत्सयते अचुकुत्सत कुत्सयाम् बभूव आस चक्रे। कुत्सयमानः कुत्सयित्वा सं कुत्स्य। कुत्स्यः कुत्सितः कुत्सनं कुत्सा कुत्सः। कुत्सना। कर्म्मणि कुत्स्यते अकुत्सि अकुत्सिषाताम्-अकुत्सयिषाताम् "वहत्कुत्समार्ज्जुनेन शतक्रतुः" ऋ० १।६३।३। कुत्सायशुष्णमशूषम्" ऋ० ४।१६।४२ "कुत्सितानि कुत्सनैः" पा०। कुत्सकः। "परिवित्तिः परीवेत्ता ब्रह्मघ्नोयश्च कुत्सकः" भा०शा०३४०अ०। "यदाऽऽश्रौषं कर्णमासाद्य सूक्तं नाब्रवीत्भीमं कुत्सयित्वा वचोभिः" भा० आ० अ० "नास्तिक्यम् वेदनिन्दाञ्च देवतानाञ्च कुत्सनम्" मनुः। "नैतच्छतच्छक्यं त्वया वेत्तुं लक्ष्यमित्येव कुत्सयन्" भा०आ० ५२८६श्लो०। अत्र परस्मैपदमार्षम्

**कुत्स** प० कुत्सयते संसारं कुत्स–अच्। १ऋषिभेदे तस्यापत्यम् ऋष्यण्। कौत्स तदपत्ये पुंस्त्री "कौत्सः प्रपेदे वरतन्तुशिष्यः" रघुः। वहुषु तस्य "अत्रिभृगु कुत्सेति" पा० लुक्। कुत्साः तदपत्येषु। क्त–बा० स पृषो०। २कुर्वति त्रि०। "कुत्साएते हर्य्यश्वाय" ऋ० ७।२५।५। "कुत्साः कुर्व्वाणाः। करोतेः कुत्सशब्दनिष्पत्तिः" भा०। ततः पश्चा०चतुरर्थ्यां फक्। कौत्सायन तन्निर्वृत्तादौ त्रि०।

**कुत्सकुशिकिका** स्त्री कुत्सानां कुशिकानां च मैथुनम् "द्वन्द्वाद्वुन्वैरमैथुनयोः" पा० मैथुने वुन्। कुत्सगोत्राणां कुशिकगोत्राणाञ्च स्त्रीपुंसां मैथुने।

**कुत्सन** न० कुत्स–भावे ल्युट्। १निन्दने "देवतानाञ्च कुत्सनम्"मनुः। कुत्स्यते ऽनेन करणे ल्युट्। २निन्दासाधनधर्म्मे उपचारात् ३तद्युक्ते त्रि०। "कुत्सितानि कुत्सनैः"पा०। वैयाकरणखसूचिः। प्रश्नविस्मरणार्थखसूचित्वेन धर्म्मेण वैयाकरणस्य निन्दनात् तादृशधर्म्मस्य कुत्सनत्वम् तद्वत्त्वाच्च खसूचकस्य तथात्वम्।

**कुत्सला** स्त्री कुत्स–कर्म्मणि बा० कलच् कुत्सं निन्दां लाति ला–क वा। नीलीवृक्षे शब्दच०। तस्य क्रयविक्रययोः निन्दितत्वात् तथात्वम् नीलीशब्दे विवृतिः।

**कुत्सा** स्त्री कुत्स–भावे अ। निन्दायाम् अमरः। "गुरुकुत्सामतिश्च या" भा०अनु०६५८९ श्लोकः।

**कुत्सित** न० कुत्स–कर्म्मणि क्त। १कुष्ठनामौषधौ (कुड़) राजनि० २निन्दिते त्रि० "कुत्सितानि कुत्सनैः" पा०। भावे क्त ३निन्दायाम् न० [ अकुन्थीत् चुकुन्थ कुन्थ्यात्

**कुथ** क्लेशे (कोँथपाड़ा)इदित् भ्वादि०अक०सेट्। कुन्थति

**कुथ** पूतिगन्धे दिवा० पर० अक०प०सेट्। कुथ्यति अकोथीत्। प्रनिकुथ्यति णिचि कोथयति (पोँथा) निखनने। तस्य